# ॥ श्री रूद्राष्टक ॥

## ॥चौपाई॥

नमामीशमीशान निर्वाणरूपम् । विभुं व्यापकं ब्रह्मवेदस्वरूपम् ॥

अजं निर्गुण निर्विकल्पं निरीहम् । चिदाकाशमाकाशवासं भजेऽहम् ॥

निराकारमोङ्कारमूलं तुरीयम् । गिराज्ञानगोतीतमीशं गिरीशम् ॥

करालं महाकालकालं कृपालुम् । गुणागारसंसारपारं नतोऽहम् ॥

तुषाराद्रिसंकाशगौरं गभीरम् । मनोभूतकोप्रिया श्रीशरीरम् ॥

स्फुरन्मौलिकल्लेलिनीचारूगङ्गा । लसद्भालवालेन्दु कण्ठे भुजङ्गा ॥

चलत्कुण्डलं शुभ्रनेत्रं विशालम् । प्रसन्नाननं नीलकण्ठंदयालुम् ॥

मृगाधीशचम्ममम्बरं मुण्डमालम् । प्रियं शङ्करं सर्वनाथंभजामि ॥

प्रचण्डं प्रकृष्टं प्रगल्भं परेशम् । अखण्डं अजं भानुकोटिप्रकाशम् ॥

त्रयः शूलनिर्मूलनं शूलपाणिम् । भजेऽहं भवानीपतिं भावगम्यम् ॥

कलातीत कल्याण कल्पान्तकारी । सदा सज्जनानन्ददाता पुरारी ॥

चिदानन्द सन्दोह मोहापहारी । प्रसीद प्रसीद प्रभो मन्मथारी ॥

न यावद् उमानाथ पादारविन्दम् । भजन्तीह लोके परे वा नराणाम् ॥

न तावत्सुखं शांति सन्तापनाशम् । प्रसीद प्रभो सर्वभूताधिवासम् ॥

ना जानामि योगं जपं नैव पूजाम् । नतोऽहं सदा सर्वदा शम्भु तुभ्यम् ॥

जराजन्म दुःखौ घतातप्यमानम् । प्रभो पाहि आपन्नमामीश शम्भो ॥

रुद्राष्टकमिदं प्रोक्तं विप्रेणा हरतोषये । ये पठन्ति नरा भक्तया तेषां शम्भु प्रसीदति ॥